नीलकण्ठकविकृत-

# कल्याणसौगन्धिकव्यायोगः ।

(वे. वेङ्कटरामविद्याभूषणेन लिखितः)

# "Kalyâna-Sougandhika"

A Drama

by

Neelakanta Kavi

1093 Kollam

tized with financial assistance from
Government of Maharashtra
on 11 June 2017

## निवेदना ।

पक्षाणामेतावन्मात्रे किलातीते केरलेषु देशा-
द्देशान्तरमाहिण्डमानोऽहं एकस्मिन् केरलब्राह्मण-
गृहे सम्पुटितं तालपत्रग्रन्थमेकमद्राक्षम्। किमिद-
मिति विशिष्यन्यस्तहृदयस्तस्मिन् केषाञ्चित्सं-
स्कृतनाटकानामादर्शमुपलब्धवान्। तेषां चनाम
विलिख्यते—

१) सुभद्राधनञ्जयं २) तपतीसंवरणं ३) दूतवाक्यं
४) नागानन्दं ५) अभिषेकनाटकं ६) प्रतिमानाटकं

ख) आश्चर्यचूडामणि च) कल्याणसौगन्धिकम् ।

इति । एषु च रूपकेषु प्रथमे षट् अनन्तशयनस्थ-
राजकीयसंस्कृतग्रन्थावलौ प्रसिद्धीकृताः । एतावद-
प्रसिद्धयोरन्तिमयोः द्वयोः सन्दर्भविज्ञाने त्वरा मे
महती जाता । अथ चासकृत्परिशीलिते सन्दर्भजाते द्व-
योरपि भासकर्तृकतया प्रसिद्धीकृतैः नाटकैः सह
सर्वतोमुखं साजात्यमवगतम् । तत्र चान्यतरदिदं
कल्याणसौगन्ध्येकं व्यायोगः ।

शोणाद्रिपुरं
२२-१-९८

वे. वेङ्कटरामविद्याभूषणः

# कल्याणसौगान्धिकं

(नान्यन्ते ततः प्रविशति सूत्रधारः)

आसीद्यः स्वनिवासशैलतुलना-
त्प्रीतः प्रसादोन्मुखो
लङ्केशस्य ससम्भ्रमाचलसुतासं-
श्लेषसौख्यप्रदात् ।
ह्रस्वं यस्य शशेऽद्भुते हुतवहे जातं
पुराणां चयं
सोऽयं मुग्धशशांकमण्डितजटा-
भारो हरः पातु वः ॥

(परिक्रम्य नेपथ्याभिमुखमवलोक्य) आर्ये इतस्तावत्।

प्रविश्य नटी

अंअ इय्यह्मि।

सूत्रधारः

अहं खलार्यमिश्रैरादिष्टः।

नटी

कहं णिअ आदेसाणुग्गहो अंआमिस्साणम्।

सूत्रधारः

आज्ञागुणेन गुणवद्भिरभिष्टुतानां
कात्यायनीचरणपंकजभक्तिभाजाम्।
षट्कर्मिणां निवसतौ परमाग्रहारे
प्राप्तप्रसूतिरुपसेवितवान् गुरुर्नः॥

तदस्य नीलकण्ठनाम्नः कल्याणसौगन्धिकं नाम निबन्धनशरीरमिदमभिनयालंकारालंकृतमनुसन्दर्शयेति।

नटी –

अंब सुद्धजप्पदुदीणं महाकवीणं णिबन्धणाणि

मोत्तूण कहं एदस्स पओअदस्सगे अंअमिस्साणं पवेसो ।

सूत्रधारः

आर्ये आश्रितवात्सल्यव्यसनी ननु सज्जनसमूहः।

अपिच,

विद्यानामतिचिरसंस्तवैकदोषात्
भुक्तानां बहुगुणतामचिन्तयित्वा ।
भोग्यानां समुपनतौ नवादराणां
सर्वोपि प्रमदमुपैति जीवलोकः ॥

नटी—

जुज्जइ।

सूत्रधारः—

तदिह सज्जीभव। अहमपि नेपथ्यविधानमनुतिष्ठामि। (परिक्रम्य कर्णं दत्वा) अये किन्नु खलु मयि सज्जननियोगानुष्ठानन्यग्रे शब्द इव श्रूयते। अङ्ग पश्यामि।

(नेपथ्ये)

भीम न खलु न खलु गन्तव्यम्। ब्राह्मणि एहि

एहि।

सूत्रधारः—

भवतु। विज्ञातम्।

अगाग्राद प्राप्यं मरुदुपहृतं दिव्यकुसुमं
गुणाढ्यं पश्यन्त्या द्विगुणितमुदा नूतनतया।
वहूनीच्छामीति द्रुपदसुतया भीममुदितं
प्रयान्तं संरोद्धुं व्रजति सकलत्रो मुनिवरः॥

(निष्क्रान्तौ)

स्थापना॥

(ततः प्रविशति सकलत्रस्तापसः)

भीम न खलु गन्तव्यम्। ब्राह्मणि पश्येहि।

पादौ मे नयने च निर्झरजलै-

रभ्युक्ष्य वक्षःस्थलं

स्पृष्ट्वा कम्पितदुर्बलं भुजयुगं

संनाह्य मूलतः।

पार्श्वे श्वासनिकम्पिते धमनिभिः

स्पष्टास्थिसंवेष्टिते

मुग्धे पीडय मन्दमन्दमसकृत्

द्राभ्यां कराभ्यामिमे ॥

ब्राह्मणी—

पत्तिअम्मत्तो मग्गो, का णाम वेदणा ।

तापसः—

मुग्धे जराभिभूतानां प्राणिनां प्राणधारणमपि महाप्रयासः। किं पुनरपरचेष्टितानि ।

ब्राह्मणी—

जइ एवं सत्थे वि अरन्नवमो परत्थे केण आजासेदोसि ।

तापसः

आः अधर्मज्ञे किन्न पराक्रायिणः स्वार्थादपि परार्थो गरीयान्। पश्य,

पुत्राः पाण्डोर्भुवनजयिनः पूरुवंशप्रदीपाः
वृत्तैः सद्भिर्विजितमनवः पञ्च पञ्चेन्द्रकल्पाः।
शत्रुध्वंसक्षपितनिमलश्रीर्यशोमानभोगाः
भागावासे वयसि मुनयः किन कारुण्यदृश्याः॥

ब्राह्मणी

कहं उण एसा जण्णसेणी एवं अणुकम्पणीअं भ-

त्तारं अदिसाहसे णिज्जोएदि ।

तापसः

ननु तदेतद्वर्तते । हृदयं हि नाम कठिनवस्तुसमुच्चयः स्त्रीणाम् । तथाहि,

वनं प्रस्थापितः पुत्रो
रामः सद्गुणभूषणः ।
प्रापितो निधनं भर्ता
केकयेन्द्रतनूजया ॥

उहि तावत् । सर्वथैनमतिसाहसान्निवर्तयिष्यावः ।

(परिक्रम्यावलोक्य) हन्त व्यर्थो नः परिश्रमः।
गन्धमादनमारूढो भीमः। य एषः,

बधिरयति जगन्ति शंखनादै:
किरति महीमगमैर्गदावरुग्णै:।
अनुचरमपगर्वमेव कुर्वन्
पितरमेवापहसन् जवेन याते।

तदागच्छं। अग्निशरणं गत्वा व्यतीतकालं स-
प्रायश्चित्तं कर्म समापयानः।

(निष्क्रान्तौ)

ततः प्रविशति गदया तरुभङ्गं नाटयन्

आध्मायमानशंखो भीमः ।

भीमः

एष भोः,

न्यायच्छन् गदया वने मृगकुलं शंखस्वनै-

स्त्रासयन्

उद्वेलीकृतसिन्धुरम्बुभिरुरः क्षिप्ताम्बु-

वाहस्रुतैः ।

पान्चाल्या मनसः प्रियाणि कुसुमान्या-

हर्तुमिच्छन् गुरोः
संघर्षादिव गन्धमादनमहं शैलेन्द्र-
मारूढवान् ॥
तदहमेषां प्रभवमन्विच्छामि। (परिक्रम्यावलोक्य) अहो भीरुजनदुरासदोयमचलोद्देशः।
अत्र हि,

अन्तर्गुहोद्गतमहाजगरास्यदंष्ट्रा-
न्याकृष्टपादमुरुगर्जितमेषसिंहः।
दंष्ट्राग्रकृष्टपृथुकुम्भतटास्थवल्गद्-

ग्रीवानिखातनरनमाक्षिपति द्विपेन्द्रम् ॥

यावदान्नेच्छामि। अहो महानयं नयनोत्सवः।

अत्रहि,

नृत्यन्ति क्वचिदत्र किन्नरवधूगीत-

स्वनानन्दितैः-

वीणावेणुमृदंगनादमुदितैर्देव्यो

वृताः खेचरैः ॥

सस्त्रीकैः करबद्धरत्नचषकैरन्यत्र

गोष्ठीगतैः

मायद्भिर्मधुरोपदंशमधुरैर्मैरेय-

मापीयते ॥

(परिक्रम्य क्वचिदानन्दाहतदृष्टिरवलोक्य)

अहोतु खलु रमणीयवस्तुविषयाणामनन्तता

रसान्तराणाम्। इहहि,

मणिफलकमनोज्ञस्वर्णडोलाधिरूढा

त्रिपुरजयेनिबद्धं गेयमानर्तयन्ती।

श्रवणयुगललोलत्कुण्डलामृष्टगण्डा

निगलयति गतिं मे मुग्धसिद्धांगनैषा ॥

केमे भरथा रत्न वस्मयनीयैः पदार्थैः। यावत्प्रिया-
नियोगमनुतिष्ठामि। (स्मर्शसुखं रूपयन्) इह
सन्निहितेन जलाशयेन भवितव्यम्। तथाहि,

अयं हि सौगन्धिकगन्धमावहन्
शनैः शनैः सान्द्रतुषारशीतलः।
परित्वजन्मे जनको यथासुखं
करोति रोमाञ्चसमाचितां तनुम्॥

इदं हि तद्दिव्यसरः। यावदुपसर्पामि। अयेमां
दृष्ट्वा दण्डपाणिरयमन्तकः प्राप्त इति वदन्तः

सरोरक्षणो यक्षराक्षसगणाः भीताः पलायन्ते।
तदस्य मार्गमनुसरामि। (परिक्रम्य सहर्षं)
सफलो मे परिश्रमः। (पुनर्निरूप्य) अहो रामणी-
यकमस्य जलाशयस्य। इहहि,

हैमाः स्वच्छे पयसि निकराः पद्म-
सौगन्धिकानां
नालैः शुभ्रैर्मरतकमयैर्वेदुमै-
श्चाभिरामाः।
नप्रेष्वच्छस्फटिकधवलेष्वागता

छायया मी

संरक्ष्यन्ते मधुरसजुषामारवैः

षट्पदानाम् ॥

तयावदुपसर्पामि । (उपसृत्य पुष्पापचयं

कृत्वा सगर्वं)

कुसुमानि हराम्येष

बाहुवीर्यमुपाश्रितः ।

यदि शक्तः पुमान् कश्चित्-

निवारयतु मामिह ॥

(नेपथ्ये)

आः दुरात्मन् अतिकठिनहृदय करुणरसान-
भिज्ञ कपटकृतसकलदुर्बलजीवलोकजीव-
ग्रहणसमुद्भवस्य दुरितसञ्चयस्य फलमिदा-
नीमनुभूयतामलकेश्वरस्य सरःसारभूतसौ-
गन्धिकापहरणसमुद्दीपितक्रोधेन क्रोधवशो-
नोपनीयमानम्।

(ततः प्रविशति खड्गहस्तः सक्रोधो राक्षसः)

राक्षसः

(आः दुरात्मन्निति पूर्वोक्तमेव पठति) इहहि,

दुष्कर्मसञ्चयकृतागसि जीवलोके
जीवग्रहोत्सवरतः खलु गर्वितस्त्वम्।
अस्मिन् क्षणे निशितवज्रनिकृन्तदेहः
त्वामन्तकान्तकरसद्मगमं करिष्ये ॥

भीमः

राक्षस किमिदं प्रलप्यते। क्वासावन्तकः।

राक्षसः

(सावधानं निर्वर्ण्य) आः मानुषः खल्वेषः।

(अपविद्धायुधः स्थित्वा पुनः खड्गमुद्धृत्य)

रेरे मानुषापशाद,

खड्गेन क्षतनिग्रहस्य पिशितैः

कृप्तोपदंशोत्तरं

कोष्णं ते रसयन् कपालचषकेणा-

कण्ठमास्रासनम् ।

आन्त्रस्रग्गुणमुद्वहन् विरचयन्

नेपथ्यमस्थिस्रजैः

नृत्यन्मत्तविलासजां धनपतेः

प्रीतं करिष्याम्यहम् ॥

भीमः

मन्ये मृतविलासजां शुचं करिष्यतीति।

राक्षसः

हहह आहारभूताः खलु मनुष्या राक्षसानां,
हनिष्यन्तीति मन्ये।

भीमः

राक्षस किन्न मनुष्यो रामः।

राक्षसः

मूढ किं किं राममपि मनुष्यं मन्यसे। किं नासौ नारायणो देवः।

भीमः—

यद्येवं अहमपि समीरणो देवः।

राक्षसः—

अनृतमेतत्। किं देवो देवस्यापराधमाचरति। अथवा,

समीरणस्त्वं भव भूमेरम्बरं
भवाम्बु तेजोथ समस्तमेव वा।

अनेन खड्गेन शिरस्तु ते क्षणा-
निपातयिष्यामि धनाधिपद्विषः ॥

भीमः—

किं किं रेरे राक्षसकीटक,
गुप्तां राक्षसपुङ्गवं हतवता येनैकचक्रा बकं
प्राप्ता येन जटोत्कचस्य जननी हत्वा हिडिम्बं क्षणात्
यः कृम्मीरमपि क्षणान्मदितवानग्रेसरं रक्षसां
तस्य त्वं मम दुर्मते वदः शिरः खड्गेन किं छेत्स्यसि॥

राक्षसः—

अतः परं खड्गस्ते कथयिष्यति ।

(उभौ युद्धं कुरुतः)

(गदया भग्नः प्रहरणमपनिधय सभयं

पलायमानो निष्क्रान्तो राक्षसः)

(नेपथ्ये)

क्षेत्रे पाण्डोरयं जातो

मारुतद्भुवनायुषः ।

स्वैरं हरतु श्रीमो मे

कुसुमानि प्रियाकृते ।

भीमः—

अनुगृहीतोस्मीदानीम्। (इति प्रतिनिवृत्तः)

(ततः प्रविशति प्रियया सह वियाधरः)

(उभौ मारुतपीडां रूपयतः)

वियाधरः—

प्रिये गुणमञ्जरि,

तिर्यग्नेकम्पयति चूर्णयते मुहुर्नौ

डोलीकरोति च गतागतमादधानः।

वप्रैरयं प्रतिहतः पवनः सुमेरोः

शृंगान्तरे मधुमदस्य करोति लीलाम् ॥

गुणमञ्जरी

(ससज्झसं) णाह गण्ह मं गण्ह। इमिणा दुन्वि-
णीदेण मारुद्दहदप्पण परिचीअमाणओणोल्लवा-
णाअवैरिणा जन पसो ण मारेइ।

विद्याधरः—

प्रिये एष गृह्णामि।

अवहितहृदयाक्षं न्यायतोद्घूर्णबाहु-
द्वितयमाभ्रान्तीं त्वां विलोलां गृहीतुम्।

सततगतिरयं मां दुर्निवारप्रवृत्ति-
र्विधिरिव विपरीतो वन्ध्ययत्नं विधत्ते ॥
किमेदानीं करिष्ये । भवतु, दृष्टं, भोः प्रभञ्जन,
भवन्मित्रस्य शक्रस्य
शासनात्तव पुत्रयोः ।
हनूमद्भीमयोः कर्तुं
कलत्रं गम्यते मया ॥
अये अनुकूलः संवृत्तः ।
गुणमञ्जरी—

णाह किण्णामहेओ एसो दुद्धमारुओ ।

वियाधरः

सप्तर्षिमण्डलग्रहाणामन्तरस्कन्धवर्ती चण्ड-
वेगः परावहो नाम ।

गुणमञ्जरी

(अपोक्ष्य) णाह किमिदं छत्तमन्तपरिमा-
णं ढरन्वीयदि ।

वियाधरः

इदमपि दूरत्वादविभावितनिस्तारमवनिचक्र-

सू। यावदवतरामः।

गुणमञ्जरी

णाह पेँरन पेँरव गुम्मा दीसन्ति।

विद्याधरः

मुग्धे नैते गुल्माः। पर्वताः खल्वमी। अवतरामः।

(अवतरणं नाटयतः)

गुणमञ्जरी

अम्मो इदं महन्तं सम्बुत्तम्।(अवतीर्य दृष्ट्वा)

किंणामहेओ एसो पव्वदो।

विद्याधरः

निषधोयमनुप्राप्तः,

गुणमञ्जरी

एसो को ।

विद्याधरः

हेमकूटोयमवस्थितः ।

गुणमञ्जरी

अज्जं अवरा को

विद्याधरः

हिमवन्नयमासन्नः,

गुणमञ्जरी

(अधो विलोक्य) किं एत्थ सरदब्भ्रमणं निअ
समूहो दीसइ।

विद्याधरः

कैलासोऽत्र विराजते॥

अत्र भगवन्तमन्तकान्तकं प्रणम्य गच्छ्यामः

नमोस्तु सकल गदैश्वर्यप्रलापनीयाय।

मुग्धेन्दुशेखरपिशंगजटाधराय

स्निग्धेन्द्रनीलमणिनीलगलान्तराय।
दुग्धोदफेनपटलामलभस्मधूली-
दिग्धाय दग्धमदनाय नमः शिवाय॥

गुणमञ्जरी

णमो पव्वईबन्धप्पणआअ।

विद्याधरः

विलासिनि सोयमासादितो गन्धमादनः य-
त्रास्ते हनुमान्।

गुणमञ्जरी

अम्मो इह हि सुनन्यसिणेहा आअदासग्गइछी
किअ दीसइ।

विद्याधरः

सत्यमाह भवती। इहहि,

प्रासादैरमृतांशुकेनधवलैः संरुद्ध-
तारागणैः

हैमैर्मौक्तिकमालिकापरिगतप्रान्तै-
र्गृहैर्भूषिता।

रागानन्दितखेचरैर्वरवधूगीतै-

मनोहारिणी

स्वर्गश्रीरलकेति नामनि नियतो भेदो

न वस्तुस्थितौ ॥

गुणमञ्जरी

(सभयं) णाह कोणु खु एसो सजलजलहरत्थणि-

अगम्भीरो सद्दो मा पीडेइ ।

विद्याधरः

(ससम्भ्रममवलोक्य) प्रिये पश्य पश्य,

गर्जन्तं घनमुपरि द्विपेन्द्रशंकी

दन्ताभ्यामभिनिनदन् विभिद्य वेगात्।
आमूलं महति महीरुहे निखातं
नोत्कर्षुं प्रभवति तो। पुनर्द्विपेन्द्रः॥

गुणमञ्जरी—

हद्धि बलगव्विदाणं पमादो।

विद्याधरः

सरिवे एष भीमस्तस्य कपीश्वरस्य कदलीवन-
मुपसर्पति। तदस्य निकटवर्तिस्फाटिकशिलात-
लमध्यासीनयोरविज्ञातपरस्परयोः प्रभाना-

न्तर्हितौ चेष्टितमवगम्य तदनुरूपमुपसर्पावः।

अपिच,

शुष्यद्दन्तच्छदकिसलयं तान्ततामायताक्षं
स्वेदैः किञ्चिल्लुलिततिलकं गण्डयोर्बद्धरागम्।
नक्तं जालैर्गलितमुदयैः तिग्मभासः प्रभाणां
वेलामेनामिह सुतनु ते विश्रमं नाञ्छतीव ॥

(अन्तर्हितौ तिष्ठतः)

भीमः

अहो प्रेयाभेलाषपरिपूरणार्थमातेत्वरितस्या-

पि मम नयन युगल मवशा मा कर्षति नगवनोद्दे-
शः।

वातेरित प्रचल नील दलाकुलोयं
पक्वैः फलैः शबलितः कदलीवनान्तः।
आभाति विद्रुमलतानिटपैः प्रभिन्न-
त्वंगन्तरंगपरिकीर्ण इवाम्बुराशिः॥

यावदुपसर्पामि। (उपसृत्य परितो विलोकयन्)
मन्ये कस्याचेदयं महानुभावस्य परिग्रहः।
न किञ्चिन्मृगपक्षिभिरपि परिणतं फलमव-

लुप्यते। किन्तत् क्षात्रं तेजः येन परतेजः प्रकर्षो मृष्यत इति। नचास्य सुयोधनस्येवं विग्रहे गुरुवचनान्तरायः। तदस्य मानशृंगमुत्पाट्य यास्यामि। (नाट्येनोत्पाट्य) भोः,

यद्यास्ते, कश्चिदिह शक्तिकृताभिमानः
कांक्षेत्पुरं यदि परेतपतेः प्रयातुम्।
सप्रोल्लसद्भ्रुकुटिभीमललाटवह्ने-
श्चण्डक्रुधः पततु मे पुरतः क्षणायुः॥

(नेपथ्ये)

आः दुरात्मन् अनात्मन्न परानासमुंलप्पनपर
अपरिज्ञातप्रकृष्ट पुरुषबलपराक्रमप्रभाव अ-
तिक्रान्तमर्याद क्रूरकर्मनिरत मानुषापशाद
दुर्विनीत किमियन्तं कालं न श्रुतिपथमुपगत-
वानस्मि ।

भीमः——

अयमयं भोः,

दृढविरचितमुष्टेर्दृष्टिभासां वितानैः
वियदधिकपिशंगैः सेन्द्रचापं प्रकुर्वन् ।

भ्रुकुटियुतललाटस्पष्टदंष्ट्रांशुजालै-
रपर इव नृसिंहो दृश्यते वानरेन्द्रः ॥

(ततः प्रविशति हनूमान्)

(सक्रोधं) अरे दुरात्मन्निति पूर्वोक्तमेव पठति,
तदधुना,

श्लक्ष्णप्रविष्टवपुषं भुवि मुष्टिपातै-
रत्पप्रयासहतजीवितमन्तकेन ।
अक्ष्णोर्निमेषसमकालमहं करोमि
क्रव्याददन्तसुरचर्वितकीकसं त्वाम् ।

भीमः——

अहो हास्यमभिधानं, वानरः किल मामेवं करिष्यति।

हनुमान्

किं किं वानर इत्यवज्ञा। हन्त भोः,

स्वैरं गोष्पदवद्विलंघ्य जलधिं नक्र-

चक्राणां गणान्

हत्वैरावतदन्तकोटिकठिनैर्वक्षः-

स्थलैर्भीषणान् ॥

प्लुष्टा येन पुरा करैर्दिनकृतोप्यस्पृष्ट-

पूर्वा भयात्

लंका किन्न स वानरो वद जगत्यस्मिन्

नवा विश्रुतः ॥

भैमः

सोपि वानरस्त्वमपि वानरः ।

हनुमान्

किं किं सोपि वानरस्त्वमपि वानर इति । तेन

हि अमुनैव तावद्वानरेण सह युध्यस्व ।

भीमः —

अहो श्लाघ्यं मे रणकर्म ।

किं वदिष्यन्ति राजानः

श्रुत्वा फल्गुनपूर्वजः ।

केनापि कपिना युद्धे

भीमः संगतवानिति ॥

हनुमान्

(आत्मगतं) एवामेदं. अय सुप्रभाता निशा।

भ्राता मे मामविज्ञाय गच्छति। किंनु खलु करि-

ष्ये। भवत्वस्य गर्वदोषमपनयामि।(प्रकाशं)
भोः पुरुष ममाज्ञामुल्लंघ्य न शक्यते गन्तुम्।
(इति पुरत आस्ते)

भीमः—

आः जरद्वानर अपसर

हनुमान्

जरद्वानरोऽस्म नापसरणक्षमः।

भीमः

त्वामुत्क्षिप्यास्मन् गिरिकूटे प्रक्षिप्य यास्या-

मि।

हनुमान् —

छन्दतः।

भीमः—

(पुच्छाग्रं स्पृष्ट्वा सरोमाञ्चं।) (आत्मगतं।)

किन्नु खलु आर्ययुधिष्ठिर इवमे सुरवस्पर्शीयं वानरः। अथवा किमयुक्तकल्पनया।

(उत्कम्पितुमशक्तः सव्रीलं)

धिङ्नागायुतसन्निभं ममबलं धिङ्-

मारुतादुद्भवं
धिग्वा दिग्विजये जयं क्षितिभृतां धिग्जि-
ष्णुसौदर्यताम् ।
प्रीतस्त्वं भव भोः सुयोधन चिरात् पा-
ञ्चालि ते मूर्धजान्
संहर्ता रिपुशोणितारुणकरः को नाम
धन्यः पुमान् ॥

हनुमान्

आत्मगतं) अहो बलं यन्मया सम्पीडितबलेन

कथाच्छेदासितम्। भोः सुयोधन मृत्युदंष्ट्रान्तरं प्रविष्टास्ते प्राणाः। (प्रकाशं) ~~भो वानर इदानीं प्राप्तस्ते कालः।~~

भीमः —

(आत्मगतं) किन्नु खलु करिष्ये। भवतु, दृष्टम्। भवत्वत्र परित्याज्याः प्राणाः। (प्रकाशं) भो वानर इदानीं प्राप्तस्ते कालः। कथापि देवतया स्तम्भितं ते शरीरं मुष्टिभिरेव पोथयामि।

यदि स मम गुरुः स्वजातिभक्त्या

स्वयमभिगम्य न नारयिष्यते माम् ।
स्फुटमिह भविता विहंगमानां
कापेपीडितेषु विभागजो विवादः ॥

हनुमान्—

इदमापे पश्यामः ।

(उभौ मुष्टिभिः प्रहत्य युद्धं कुरुतः)

(विद्याधरः द्वयोरन्तरं प्रविश्य निवारयन्)

हनुमन् भीम युवयोः
भ्रात्रोर्ज्येष्ठकनिष्ठयोः ।

मारुत्योः किमिदं घोर-
मसाम्प्रतमुपस्थितम् ॥

भीमः

(विलज्य स्थित्वा आत्मगतं) युक्तमेतत् स्पर्श-
सुखं संवृत्तम् ।

हनुमान्

कुन्तीमातः प्रहि ।

भीमः

(उपसृत्य) आर्य अभिवादये ।

हनुमान्—

एह्येहि वत्स अयं खल्विदमवगतम्।

लज्जानमद्दनमन्यरमीक्षणार्थं

सम्प्रस्थाय हृतकरद्वयरुद्धवक्षः।

साकूतदर्शनकृतैककटाक्षपात-

माश्लेषसौख्यमनुजस्य सुधेत्यभेदः॥

(ससम्भ्रमं नियाय्यरमवलोक्य) आमोदाद्दिस्मृतः समुदाचारः। भद्रमुख एतदासनमास्यताम्।

विद्याधरः—

ननु युवामपि श्रान्तौ ।

हनुमान्—

आस्व कुमार आस्व ।

(सर्वे उपविशन्ति)

अथ कोऽत्र भवान् ।

विद्याधरः

अहं पुरन्दरस्य नियोगकारी कल्याणको नाम

विद्याधरः । इयं च मे सहचारिणी गुणमञ्जरी

नाम।

हनुमान्—

कुत इदानीम्।

विद्याधरः—

स्वर्गादागतोस्मि।

भीमः—

अपि वृत्तेन परितोषयति पितरमर्जुनः।

विद्याधरः

किमिति न परितोषयेन्महासत्वः।

भीमः—

कथं महासत्व इति।

विद्याधरः—

भोः श्रूयताम्। प्रवृत्ते खलु नृत्तोत्सवे स्वर्गशाप्रभवभूमिकायां सस्पृहमवलोकितायां अनुपश्यतो गुरोराज्ञाकरेण सख्या चित्रसेनेन प्रेषितां,

शृंगारवेषरमणीयवपुःप्रकाशां
रंगोत्थितामुपगतां स्वयमेव शय्याम्।

तामुर्वशीमुपचरन् गुरुभिः समानां
लज्जानमद्भदनचन्द्रमसं चकार ॥

इति।

भीमः

भोः सदृशमिदमनुष्ठितम्।

हनुमान्—

अथ किमागमनप्रयोजनम्।

विद्याधरः

अहं खलु सेवागतोयमुपद्धरमाहूय स्वामिना

समादिष्टः, यथा – रामलक्ष्मणयोरिव भ्रातृत्वं युवयोरवबोध्यतेति।

(हनुमान् हा राम इति मूर्छितः पतति)

उभौ —

समाश्वसिहि समाश्वसिहि।

हनुमान्

(समाश्वस्य) हा भक्तवत्सल किन्न जानीषे।

शाखामृगोस्मि तरुपल्लवमात्रसारः

स्तुत्यः सतां सदसि यस्य परिग्रहेण।

तेन त्वया विरहितो रघुनन्दनेन
भारं महान्तमिव जीवितमुद्वहामि ॥

हा नाथ,

पवनतनय हे सखे हनुम-
न्निति विगलद्वचनामृते मुखेन्दौ।
तव नरद दशाज्ञकुर्वतो मे
परमिव वञ्चनमेव दीर्घमायुः ॥

हा वैदेहि.

जनकं जनकं किलाऽऽलोको

जनकस्त्वं जनयन् पुनर्ममासून् ।
इति जानकि यत्त्वयाहमुक्तः
क्षरदास्रं मनसीन तन्ममाय ॥

हा लक्ष्मण,

भ्रातुर्ज्येष्ठस्य तं स्नेहं
विभज्य मयि भृत्यताम् ।
कथमेकः कृतान्तत्वं
समग्रमनुभूतवान् ॥

भीमः

धीरः भवान् नात्यर्थं शोकवश्यो भवितुमर्हति।
वियोगपरिणामो ननु संयोगः।

हनुमान्

कुमार इदानीं कृतार्थोऽस्मि।

भीमः

अहो गुणवत्तारामस्य। यदयमार्यस्य वशायतीति हृदयम्। यदि नात्यायतस्तस्य महात्मनः चरितश्रवणकुतूहले मे चेतः।

हनुमान्

कुमार श्रूयताम्। सरवल धर्मसंरक्षक्षार्णं मानुषतामुपगतो भगवान् विष्णुः।

हित्वा राज्यसुखं पितुर्वचनतो नक्तं-
चरान् कानने
हत्वा शूर्पणखानिकाररुषितानन्विष्य
सीतां हृताम्।
कृत्वा बालिवधार्जितेन सुहृदा सेतुं
व्यतीताम्बुधः
लंकेशं हतवांस्तमन्यमकरोत्प्राया-

अयोध्यां पुनः ॥

ततः सहस्राधेकमयुतं वर्षाणामनुरञ्जितजीव-
लोकः स्वर्गलोकमितो गतवान् ।

भीमः —

आर्य महानयमनुग्रहः । कथेयममृतसेकइव
श्रवणयोः ।

विद्याधरः

यथानदनुष्ठितशासनममराधिपतेर्निवेदयामि,

हनुमान्

एवं गच्छतु भवान् पुनर्दर्शनाय।

(निष्क्रान्तो नियाधरः सह प्रियया)

हनुमान्

अयमे सफलं चक्षुः

स्मारितश्चापि राघवः।

भूयस्तन्वद्गात्रसंश्लेष-

मिच्छत्येषा तनुर्मम ॥

(इति परिष्वजति)

कुमार थार्तराष्ट्रानधिकृत्य एषमे निश्चयः।

अनतिचिरविमुक्तैर्निष्ठुरैर्मुष्टिपातैः
स्फुटितपृथुशरीरा वैरिणस्तावकीनाः।
रणशिरसि हतानां कौरवा राक्षसानां
गतिभिरविरलाभिः शोधयिष्यन्ति मार्गम्॥

भीमः

एवं चेदभ्यर्थो मे भुजयुगलयोर्भारः।

हनुमान्

भवत्वेवं तावत् करिष्ये

निग्योष्ठशुष्कास्यानि शोषितासून्

कर्तास्मि सन्नो ज्वलनप्रकाशान्।
पार्थस्य सत्केतुललामवासी
प्रक्षीणपक्षान् युधि धार्तराष्ट्रान्॥

भीमः

दिष्ट्या सनाथाः पाण्डवाः

हनुमान्

कुमार किन्ते भूयः प्रियमुपहरामि।

भीमः

प्रियं प्रियाया विहितं वशीकृता

विजित्य सर्वे परिपन्थिनः पथि ।
त्वदंगसंगाच्च तनुर्विशोधिता
कृतार्थभूतैः किमिनान्यदिष्यते ॥

भरतवाक्यम्

तथाप्येतावदस्तु

दोषान्ध्य नाशमुपयान्तु कृतघमुष्यां
भूयोभवं क्षमयतां ममनीलकण्ठः ।
निर्धार्तराष्ट्र नियतिं निरखिलां धरित्रीं
पायान्नृपः सविजयोयमजातशत्रुः ॥

कल्याणसौगन्धिकव्यायोगः

समाप्तः

x —•— x

॥ शुभमस्तु ॥

श्रीः। श्रीः। श्रीः। श्रीः। श्रीः। श्रीः। श्रीः। श्रीः। श्रीः

= Copied from the original manuscript by V. Venkatāchala Sharma 'Vidyabhooshana' @ Tiruvandrum Chalai



tized with financial assistance from Government of Maharashtra on 11 June 2017

कल्याणसौगन्धिकं समाप्तं